# Shri Adbhutananda Stotram

# શ્રીઅદ્ભુતાનન્દસ્તોત્રમ્

## Document Information

Text title : Shri Adbhutananda Stotram

File name : adbhutAnandastotram.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Kumudaranjana Goswami

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# Shri Adbhutananda Stotram

# શ્રીઅદ્ભુતાનન્દસ્તોત્રમ્

નિરક્ષરં મહાપ્રાજ્ઞં ભક્તશ્રેષ્ઠં ગુણોત્તમમ્ ।
રામકૃષ્ણપ્રભોરેવં રામદત્તસ્ય સેવકમ્ ॥ ૧॥

અન્તર્બહિશ્ચ પશ્યન્તં ભગવન્તં સદામુદા ।
વીક્ષ્ય શ્રીરામકૃષ્ણો યં દીક્ષાં પ્રદાત્ સ્વલીલયા ॥ ૨॥

સેવયા રામકૃષ્ણસ્ય શારદાકરુણાબલાત્ ।
ધર્મતત્ત્વં નિરીક્ષન્તં હસ્તામલકવચ્છિવમ્ ॥ ૩॥

તત્ત્વાન્યુપનિષદ્ગાનિ સ્વાનુભૂત્યા વિકાસયન્ ।
નિર્વૃત્તિં યઃ પરાં લેભે તન્નમામઃ સદાદ્ભુતમ્ ॥ ૪॥

રામકૃષ્ણસ્ય મહતીં સૃષ્ટિમદ્ભુતમદ્ભુતામ્ ।
મન્યતે યં મહાભક્તં વિવેકાનન્દરૂપધૃક્ ॥ ૫॥

એવં ભક્તોત્તમં શ્રેષ્ઠં લીલામાનસ વિગ્રહમ્ ।
અદ્ભુતન્ત્વદદ્ભુતાનન્દં ભૂયો ભૂયો નમામ્યહમ્ ॥ ૬॥

જગત્યામવતીર્ણસ્ય સાધકસ્ય પ્રિયસ્ય ચ ।
તસ્ય શ્રી પાદપદ્મે નઃ પ્રણામાઃ સન્તુ નિત્યશઃ ॥ ૭॥

અદ્ભુતં ચરિતં નિત્યં સ્મરેયુર્ભયવિહ્વલાઃ ।
તેષાં સર્વં ભયં યાયાદ્ ભવોદ્ભવભયેન ચ ॥ ૮॥

ઇતિ અધ્યાપકપણ્ડિતશ્રીકુમુદરઞ્જનગોસ્વામીતર્કવેદાન્તતીર્થવિરચિતં
"શ્રીમદદ્ભુતાનન્દસ્તોત્રમ્" સમ્પૂર્ણમ્ ।

પ્રણામમન્ત્રઃ-
નિરક્ષરોઽપિ સર્વં યો જાનાતિ ગુરુસેવયા ।
નમોઽસ્ત્વદદ્ભુતપાદાય પશ્ચિમોત્તરદેશિનઃ ॥

Proofread by Aruna Narayanan

*Shri Adbhutananda Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*